संस्कृत.

ग्रं.नं.७४

स्तोत्र.

# बटुभैरव स्तोत्र.

५९८ | स्तो.

२६५

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(१)

बटुभैरवस्तोत्रप्रारंभः॥ ॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

श्रीगणेशाय नमः। श्रीबटुकाय नमः। मेरूपृष्ठे सुखा
सीनं देवदेवं त्रिलोचनं॥ शंकरं परिपप्रच्छ पार्वती पर
मेश्वरं॥१॥ श्रीपार्वत्युवाच भगवन्सर्वधर्मज्ञ सर्वशा
स्त्रागमादिषु॥ आपदुद्धारणं मंत्रं सर्वसिद्धिप्रदं नृणां॥२॥
चैव सर्वेषां भूतानां हितार्थं वांछितं मया॥ विशेषतस्तु राज्ञां वै शां
तिपुष्टिप्रसाधनं॥३॥ अंगन्यासकरन्यासदेहन्याससस
मन्वितं॥ वक्तुमर्हसि देवेश मम हर्षविवर्द्धनं॥४॥ ईश्वर उ
वाच शृणु देवि महामंत्रमापदुद्धारहेतुकं॥ सर्वदुःखप्रश
मनं सर्वशत्रुविनाशनं॥५॥ अपस्मारादिरोगाणां ज्वरादीनां विनाशनं।
नोंधिविशेषतः॥ स्मृतिमात्रेण मंत्रराजमिमं प्रिये॥
[illegible] सर्वकामार्थदं [illegible] ज्यभोमप्रदायकं ग्रह राजभया

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(2A)

नांचनाशनंसुखवर्द्धनं॥स्नेहाद्वक्ष्यामितेमंत्रंसर्वसा
रमिमंप्रिये॥७॥सर्वकामार्थदंमंत्रंराज्यभोगप्रदाय
इस्वेर्यं च॥आपदुद्धार~~णमिति~~विर्यंमंत्रंवक्ष्याम्यशेषतः॥८॥प्रणवं
पूर्वमुद्धृत्यदेवीप्रणवमुद्धरेत्॥बटुकायेतिवैपश्चादापदु
द्धारणायच॥९॥कुरुद्वयंततःपश्चाद्बटुकायपुनर्वदेत्॥
देवीप्रणवमुद्धृत्यमंत्रोद्धारमिमंप्रिये॥१०॥मंत्रोद्धारमि
मंदेवीत्रैलोक्येचातिदुर्लभं॥अप्रकाश्यमिमंमंत्रंसर्व
शक्तिसमन्वितं॥११॥स्मरणादेवमंत्रस्यभूतप्रेतपि
शाचकाः।विद्रवंत्यतिभीतावैकालरुद्रादिकःप्रजाः॥
पठेद्वापाठयेद्वापिपूजयेद्वापिपुस्तकं॥नाग्निचोरभ
यंतत्रग्रहराजभयंतथा॥१२॥नचमारीभयंकिंचित्स

A joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai

भै०
२

(3)

र्त्रिसुखवान्भवेत्॥ आयुरारोग्यमैश्वर्यंपुत्रपौत्रादि
संपद॥१४॥ भवंतिसततंतस्यपुस्तकस्यापिपूजना
त्॥ नक्षारिद्र्यंनदौर्भाग्यंनापदोभयमेवच॥१५॥ पार्वत्यु०
यएषभैरवोनामआपदुद्धारणोमतः। त्वयाचकथितोदे
वोभैरवःकल्पउत्तमः॥१६॥ तस्यनामसहस्राणिप्रयु
तान्यर्बुदानिच॥ सारमुद्धृत्यतेषांवैनामाष्टशतकंवद॥
यानिसंकीर्त्यमर्त्यःसर्वदुःखविवर्जितः। सर्वान्कामान
नैवाप्नोतिसाधकःसिद्धिमेवच॥१८॥ ईश्वरउवाच॥
शृणुदेविप्रवक्ष्यामिभैरवस्यमहात्मनः। आपदुद्धारक
स्यहनामाष्टशतमुत्तमं॥ सर्वपापहरंपुण्यंसर्वापद्वि
निवारणं। सर्वकामार्थदंदेविसाधकानांसुखावहं॥२०॥

स्य नामाष्टशतकस्यास्य छंदोनुष्टुभकीर्तितं ॥ बृहदार ५

ण्यकोनाम ऋषिर्देवोथ भैरवः ॥ २१ ॥ ॐ ह्रीं

बाकुस्मिन्नयनइ लिबिजं समाहितं ॥ शक्ति

कं किलकं शेषमिष्टसिद्धौ नियुज्यते ॥ २२ ॥

भैरवं मूर्ध्नि विन्यस्य ललाटे भीमदर्शनं ॥

नेत्रयोर्भूतहननं सारमेयानुगं भ्रुवोः ॥ २३ ॥

कर्णयोर्भूतनाथं च प्रेतवाहं कपोलयोः ॥

नासापुटोष्ठयोश्चैव भस्माङ्गं सर्पभूषणं ॥ २४ ॥

(3A)

(5)

अनादिभैरवं तमास्ये च शक्तिहस्तं गले न्यसेत्॥ स्कंधयो
र्दैत्यशमनं बाह्वोरतुलतेजसं॥२५॥ पाण्योः कपालि
नं न्यस्य हृदये मुंडमालिनं। शांतं वक्षस्थले न्यस्य
स्तनयोः कामचारिणं॥२६॥ उदरे च सदा तुष्टं क्षेत्रेशं
पार्श्वयोस्तथा॥ क्षेत्रपालं पृष्ठदेशे क्षेत्रज्ञं नाभिदेश
के॥२७॥ पापौघनाशनं कट्यां बटुकं लिंगदेशके॥ गुदे र
क्षाकरं न्यस्य तथोर्वोर्भक्तलोचनं॥२८॥ जान्वोर्घुर्घुर
रावं जंघयो रक्तपायिनं॥ गुल्फयोः पादुकासिद्धं पा
दपृष्ठे सुरेश्वरं॥ आपादमस्तके चैव आपदुद्धारकं
तथा॥ हृदये भैरवनाथं च आदिनाथाय महूं नि॥ ध्या॥
प्रचंडडमरुहस्तं च दक्षिणे दंडधारिणं॥ खड्गहस्तं



Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(9A)

पश्चिमे च घंटावादिन स्तुत्तरे ॥३१॥ आग्नेय्यामग्निव
र्णं च नैर्ऋत्यां चदिगंबरं ॥ वायव्ये सर्वभूतस्थं ईशा
न्यां चाष्टसिद्धिदं ॥३२॥ ऊर्ध्वं रवे चरिणं न्यस्य पाता
ले रुद्ररूपिणं ॥ एवं विन्यस्य देहे स्वे षडंगेषु ततो न्यसे
त् ॥३३॥ हृदये भूतनाथाय आदिनाथाय मूर्द्धनि ॥
आनंदपदपूर्वाय नाथाय पशिखासु च ॥३४॥
सिद्धेश्वरनाथाय कवचे विन्यसेत्तदा ॥ सहृ
जानंदनाथाय न्यसेन्नेत्रयेतथा ॥३५॥ निःसीमा
नंदनाथाय अस्त्रे चैव प्रयोजयेत् ॥ एवं न्यास
विधिं कृत्वा यथावत्तदनंतरं ॥ ध्यानं तस्य प्रव
क्ष्यामि यथाध्यात्वा पठेन्नरः ॥ शुद्धस्फटिक

Property of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

संकाशंसहस्त्रादित्यवर्चसं॥अग्निवर्णसमोपेतंसार
(5) मेयसमन्वितं॥३७॥नीलजीमूतसंकाशंनीलांज
नसमप्रभं॥अष्टबाहुंत्रिनयनंचतुर्बाहुंद्विबाहुकं॥
दंष्ट्राकरालवदनंनूपुरारावसंकुलं॥भुजंगमेखलं
देवमग्निवर्णशिरोरुहं॥३९॥दिगंबरंकुमारेषंबटुका
ख्यंमहाबलं॥खट्वांगमसिपाशंचशूलंदक्षिणबा
हुतः॥४०॥डमरूंचकपालंचवरदंभुजगंतथा॥उत्तरा
गैवंद्रधरंदिव्यरूपमहाभुजं॥४१॥ध्यात्वाजपेत्सुसंहृ
ष्टःसर्वान्कामानवाप्नुयात्॥४२॥ अथध्यानं करक
लितकपोलःकुंडलीदंडपाणिस्तरुणतिमिरनीलोव्या
लयज्ञोपवीती॥क्रतुसमयसपर्याविघ्नविच्छेदहेतुर्ज



Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(5A)

मति बटुकनाथः सिद्धिदः साधकानां ॥४२॥ इति ध्यानं।
अस्य श्री आपदुद्धारबटुकभैरवस्तोत्रस्य। बृहदारण्य
को नाम ऋषिः। भैरवो देवता। अनुष्टुप् छंदः। ह्रीं बीजं।
बटुकायेति शक्तिः। ॐ कीलकं। मम अभीष्टकामनासि
ध्यर्थं बटुकभैरवस्तोत्र जपे विनियोगः। ॐ ह्रां बां अंगु
ष्ठाभ्यां नमः। ॐ ह्रीं बीं तर्जनीभ्यां० ॐ ह्रूं बूं मध्यमाभ्यां० ॐ
ह्रैं बैं अनामि० ॐ ह्रौं बौं कनि०भ्यां० ॐ ह्रः बः करतल
करपृष्ठाभ्यां नमः। ॐ ह्रां बां हृदयाय नमः। ॐ ह्रीं बीं सि
रसे० ॐ ह्रूं बूं शिखायै वषट्। ॐ ह्रैं बैं कवचाय हुं ॐ
ह्रौं बौं नेत्रत्रयाय वौषट्। ॐ ह्रः अस्त्राय फट्। ॐ
बः।

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

५ भैरवोभूतनाथश्च भूतात्माभूतभावनः। क्षेत्रज्ञः क्षेत्रपा
लश्च क्षेत्रदः क्षत्रियोविराट्॥४३॥ श्मशानवासी मांसा
(6) शी खर्पराशी खरांतकः। रक्तपः पानपः सिद्धः सिद्धिदः
सिद्धसेवितः। कंकालः कालशमनः कलाकाष्ठातनुः क
विः॥ त्रिनेत्रो बहुनेत्रश्च तथा पिंगललोचनः॥४५॥ शू
लपाणिः खड्गपाणिः कंकाली धूम्रलोचनः। अभीरुर्भै
रवोनाथो भूतपो योगिनीपतिः॥४६॥ धनदो धनहा
री च धनवान् प्रतिभानवान्॥ नागहारो नागपाशो व्यो
मकेशः कपालभृत्॥ कालः कपालमाली च कमनीयः
कलानिधिः। त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रि
लोकपः।४५॥ त्रिनेत्रतनयो डिंभः शांतः शांतजनप्रि ५

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

वे

मः।वटुको बटुवेशश्च खट्वांगवरधारकः।भूता
ध्यक्षः पशुपतिर्भिक्षुकः परिचारकः।धूर्त्तो दिगंब
रः शूरो हरिणः पांडुलोचनः॥५०॥प्रशांतः शांतिदः शु
द्धः शंकरः प्रियबांधवः।अष्टमूर्त्तिर्निधीशश्च ज्ञान
चक्षुस्तपोमयः॥५१॥अष्टाधारः षडाधारः सर्पयुक्तः
सखीसखा। शिखीसखः।भूधरो भूधराधीशो भूपतिर्भूधरात्मजः।
कंकालधारी मुंडी च व्यालयज्ञोपवीतकः।जृंभणो मो
हनः स्तंभी मारणक्षोभणस्तथा॥५२॥शुद्धो नीलांजन
पि प्रख्यो दैत्यहा मुंडभूषितः।बलिभुग्बलिभुङ्नाथो बा
लो बालपराक्रमः॥५३॥सर्वापत्तारणो दुर्गो दुष्टभू
तनिषेवितः।कामी कलानिधिः कांतः कामिनीव

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

भै.
६

(७)

शाकंदुरी॥सर्वसिद्धिप्रदोवैद्यःप्रभुर्विष्णुरमीवहा।
अष्टोत्तरशतंनाम्नांभैरवस्यमहात्मन॥५६॥मयोते
कथितंदेवीरहस्यंसर्वकामदं॥यइदंपठतेस्तोत्रंनामाष्ट
शतमुत्तमं॥नतस्यदुरितंकिंचिद्रोगाणांचभयंतथा॥न
शत्रुभ्योभयंकिंचित्प्राप्नुयान्मानवःक्वचित्॥५७॥नपा
तकभयंचैवयःपठेत्स्तोत्रमुत्तमं॥मारीभयेराजभयेत
थाचोराग्निजेभये॥५८॥औत्पातिकेमहाघोरेतथा
दुःस्वप्नजेभये॥बंधनेचमहाघोरेपठेस्तोत्रमनुत्तमं॥
सर्वंप्रशममायातीभयंभैरवकीर्तनात्॥एकादशास
हस्त्राणिपुरश्चरणमुच्यते॥६०॥यस्त्रिसंध्यंपठेद्देवी
संवत्सरमतंद्रितः॥ससिद्धिंप्राप्नुयादिष्टांदुर्लभामपि

६

(7A)

मानवः। षण्मासाद्भूमिकामस्तु जपित्वा प्राप्नुयान्म
ही। राजशत्रुविनाशार्थं जपेन्मासाष्टकं निशि॥६३॥
रात्रौ वस्त्रत्रयं चैव नाशयत्येव वैरी॥ त्रवान्॥ जपेन्मास
त्रयं मत्स्यो राजानं वशमानयेत्॥६४॥ धनार्थी वासु
तार्थी वा दारार्थी चित्तु मानवः॥ जपेन्मासत्रयं देवीवार
मकं महानिशि॥६५॥ धनं पुत्रांस्तथा दारान्प्राप्नुया
न्नात्र संशयः। रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात्॥
भीतो भयात्प्रमुच्येत देवीसत्यं न संशयः। निगडैश्चापि
यो बद्धः कारागृहनिपातितः॥६६॥ श्रृंखलाबंधनप्रा
मः पठेन्नैव दिवा निशि। यान्यान्समीहते कामांस्तान्
तान्प्राप्नोत्य संशयं॥६७॥ अप्रकाश्यं परं गुह्यं न देयं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

ब.भै

७ यस्यकस्यचितु। सुकुलीनाय शांताय ऋजवे दंभवर्जि
ते॥६९॥ दद्यात्स्तोत्रमिदं पुण्यं सर्वकामफलप्रदं॥ भैर
(8) वोपि प्रहृष्टोभूत्तच्छ्रुत्वैव महेश्वरः। एवं श्रुत्वा ततो देवी
नामाष्टशतमुत्तमं। संतोषं परमं प्राप्य भैरवस्य महात्म
नः। जजाप परया भक्त्या सदा सर्वेश्वरेश्वरी॥७०॥ ध्या।
दिव्याकल्पैर्नवमणिमयैः किंकिणीनूपुराद्यै दीप्ताकारं
द विशदवसनं सुप्रसन्नं त्रिनेत्रं॥ हस्ताभ्यां वै बटुकमनिशं
शूलखड्गौ दधानं॥१॥ [illegible]स्करसंनिभं त्रिनयनं रक्तां
गरागस्रजं स्मेरास्यं वरदं कपालमभयं शूलं दधानं क
रैः॥ नीलग्रीवमुदारकौस्तुभधरं शीतांशुचूडोज्ज्वलं॥
\+ बंधूकारुणवाससं भयहरं देवं सदा भावयेत्॥२॥। ७

Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**

राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)

**दूरध्वनी क्रमांक** (०२५६२) २३३८४८

**Email ID** : rajwademandaldhule@gmail.com